॥ ॐ ॥

॥ वन्दे शिवं सुन्दरम् ॥

सानन्द मानन्द वने वसन्त मानन्दकन्दं हतपाप वृन्दम् ।
वाराणसीनाथमनाथमाथं श्री विश्वनाथं शरणं प्रपद्ये ॥

सारतिक-पुष्पाञ्जलि शिव-नामावलि-पञ्चाक्षरम्

श्री पुष्पदन्त प्रणीत

श्री शिवमहिम्नःस्तोत्रम्

श्रीमत्परम हंस परिव्राजकाचार्यानन्तश्री विद्यानन्दगिरि
शिष्य श्री स्वामि प्रकाशानन्द विजाय शास्त्री
व्याकरण वेदान्ताचार्य

कृतान्वय प्रतिपदार्थ प्रबोधिनी सरलार्थ भाषा टीकासमन्वितश्च

द्वितीयावृत्तिः २००० } वि० सं० २०१० } मूल्यमर्धरूप्यकम्

: प्रकाशक :
स्वामिश्री प्रकाशनन्द विजयी शास्त्री.
स्वामी श्री चेतनानन्द गिर्याश्रम,
कनखल (सहानपुर) उत्तर प्रदेश

: मुद्रक :
के. एल्. एन्. राव
मुंबई वैभव प्रेस : मुंबई नं. ४



भगवान शिव

॥ ॐ ॥

— प्राक् कथन —

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥

शास्त्रों ने संसार में मनुष्यजन्म के चार फल बतलाये हैं धर्मअर्थ, काम और मोक्ष । आत्मा से परमात्मा बना कर मोक्ष लाभ के लिए साधन पक्ष में परस्पर वैमत्य रखते हुए भी इस सिद्धान्त का किसी ना किसी रूप में समस्तशास्त्र स्वीकार करते हैं कि "ऋते ज्ञानान्नमोक्षः" "ज्ञानादेव तु कैवल्यम्" अर्थात् ज्ञान के विना मुक्ति नहीं और ज्ञान से ही मुक्ति होती है। यह भी प्रसिद्ध है कि "विद्याकामस्तु गिरिशम्" "ज्ञानमिच्छेन्महेश्वरात्" यानी ज्ञान की सद्यः प्राप्ति महेश्वर से ही होती है सच है वे ओढर दानी जो ठहरे ।

अन्तःकरण की शुद्धि से ज्ञान होता है और योग-कर्म आदि उस के अनेक उपाय हैं। योगादिकों को तो "समय एव करोति बलाबलम्" के अनुसार समयने निगल सा लिया है। अत एव मध्यम मार्ग (भक्ति मार्ग,) ही सर्व सुलभ सर्वसुगम और सर्वश्रेष्ठ है। भक्ति मार्ग के भी नौ भेद हैं। जिन में "सततं कीर्तयन्तो माम्" को ही कलियुग में मुख्य माना गया है। संकीर्तन का स्थूल रूप नामजप स्तोत्रादि ही है, और पण्डितवर्ग में शिव महिम्नः स्तोत्र को अत्युत्तम स्तोत्र माना जाता है। कविता, छन्द, रस, अर्थ, भाव, अलंकार आदि, हर एक दृष्टि से परखिये, है भी यह अपने ढंग का एक ही। स्तोत्रकर्ता श्री पुष्पदन्ताचार्य के पांडित्य और जीवन का स्वल्प परिचय पाठकों को स्तोत्र से ही मिल जायगा ।

इस पर श्री मधुसूदन सरस्वती आदि धुरंधर विद्वानों की अतिगम्भीर संस्कृत टीकाएं यद्यपि अनेक उपलब्ध हैं, तो भी साधारणपठितजनसमाज के लिये उन सब का अनुपयोग ही रहा है और हिन्दी टीकाएँ जो भी प्राप्त हैं वे सब अर्थ-भाषा

मूलपाठ-कागज आदि की दृष्टि से सर्वथा अग्राह्य तथा इस स्तोत्र राज के अननुरूप ही हैं। अत एव सर्व साधारण के लाभार्थ ही अन्वय प्रतिपदार्थ और भाव के सहित सरल हिन्दी में शिवम० स्तो० अ० प्र० प्रबोधिनी टीका लिखी है। इसके लिखवाने में कविकान्त श्री निगमानन्दजी शास्त्री प्रभाकर ब्र० ब्रह्मानन्दजी शास्त्री स्वा० सर्वानन्द गिरिजी शास्त्री की प्रेरणा और शिव भक्तमाताओं तथा बन्धुओं का सदाग्रह ही मुख्य कारण है।

इस में मानवस्वभावसिद्ध दोषवश, आयसाक्षर संयोजक-दोषवश वा जिन भूलों का रह जाना सम्भव है उन सब के लिए सदयहृदयसहृदय महोदय समुदाय से सादर सविनय निवेदन है कि स्वकीयपरमोदारस्वभावा-नुसार "गच्छतां स्खलनं क्वापि" न्यायानुगत मुझे समझ, क्षमा करें और लाभ उठा कर मेरे प्रयत्न को सफल करें।

श्री मातृ मण्डल अमृतसर ने सटीक शिव महिम्नः स्तोत्र के प्रथममुद्रण का व्यय और राज नियमानुसार पुर्नमुद्रणादि का अधिकार स्वायत्त करके शिवभक्ति का पूर्ण परिचय दिया है। मैं मण्डल को आशीर्वाद देता हूं और भगवान् से प्रार्थना करता हूं कि भगवान् आशुतोष-शिव मातृ-मण्डल को अपनी भवभय-हारिणी भक्ति दें और धार्मिक कार्यों में उत्साह द्विगुणित करें।

श्री शिव म० स्तो० अ० प्र० भा० टीकावलोकन मात्र से पूर्वलेख (प्रूफ) संशोधन कार्य में परम सहायक पण्डित श्री देवदत्तजी शास्त्री अ० गीताभवन दुर्ग्याणा अमृतसर का तो कोटिशः हार्दिक धन्यवाद! जिन्होंने परीक्षा समयमें भी मेरी सहायताकी। पुनश्च प्रार्थयासि पाठकपाठिकागणसविधे यद् गच्छतां स्खलनं क्वापि, इति, किमधिकमधिकज्ञेषु।

विक्रमी सं २००७) वर्षप्रतिपदा
श्रीचेतनानन्द गिर्याश्रम कनखल
हरिद्वार।

इति शुभम्

विद्वद्वशंवदः—
प्रकाशानन्द विजयी शास्त्री
व्या. वे. आचार्य

॥ ॐ तत्सत् ॥

श्री—विश्वनाथो विजयतेतराम् ।

★ शिव-आरतिकम् ★

हरिः ओ३म्

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषायशाश्वते सहस्रकोटीयुगधारिणे नमः ।

ॐ जय गङ्गाधर हर शिव जय गिरिजाधीश शिव जय गौरीनाथ त्वं मां पालय नित्यं २ कृपया जगदीश--

ॐ हर हर हर महादेव ।

कैलासे गिरिशिखरे कल्पद्रुमविपिने शिवकल्प० गुञ्जति मधुकरपुंजे २ कुञ्जवने गहने ॥ कोकिल कूजति खेलति हंसावलि ललिता शिव हंसा० रचयति कला-कलापं २ नृत्यति मुद सहिता ॐ हर ३ महादेव ॥ १ ॥ तस्मिल्लँलित सुदेशे शाला मणिरचिता शिवशाला०

तन्मध्ये हर निकटे २ गौरी मुदसहिता ॥ क्रीडां रचयति भूषां रञ्जित निजमीशं शिव रञ्जित० इन्द्रादिक सुर सेवित २ प्रणमति ते शीर्षम् ॐ हर हर हर महादेव ॥ २ ॥ विबुध वधूर्बहु नृत्यति हृदये मुदसहिता शिव हृदये० किन्नर गायन कुरुते २ सप्त स्वर सहिता ॥ धिनकतथै थै धिनकत मृदंग वादयते शिव मृदंग० क्कण क्कण ललिता वेणु मधुरं नादयते ॐ हर ३ महादेव ॥ ३ ॥ रुण रुण चरणे रचयति नूपुर मुज्वलितं शिव नूपुर० चक्रावर्ते भ्रमयति २ कुरुते तांधिक्तां ॥ तां तां लुप चुप तालम् नादयते शिव तालम्० अङ्गुष्ठांगुलिनादं २ लास्यकतां कुरुते ॐ हर ३ महादेव ॥ ४ ॥ कर्पूरं द्युतिगौरं पंचाननसहितं शिवपञ्चा० त्रिनयनशशधरमौले २ विषधरकण्ठयुतं ॥ सुन्दरजटाकलापं पावकयुतभालम् शिव पावकशशि० डमरु त्रिशूलपिनाकं २ करधृतनृकपालम् । ॐ हर ३ महादेव ॥ ५ ॥ शङ्खनिनादं कृत्वा झल्लरि नादयते शिवझल्लरि० नीराजयते ब्रह्मा नीराजयते विष्णुर्वेदऋचां पठते इति मृदुचरणसरोजं हृदि कमले धृत्वा शिव हृदि० अवलोकयति महेशं शिवलोकयतिसुरेशं ईशम् अभिनत्वा ॐ हर ३ महादेव ॥ ६ ॥ रुण्डै रचयति मालां पन्नगमुपवीतं शिवपन्नग० वामविभागे गिरिजा २ रूपम् अति ललितं ॥ सुन्दरसकल शरीरे मनसिजकृत भस्माभरणं शिवकृत० इतिवृष-

भध्वजरूपं हरशिवशङ्कररूपं तापत्रयहरणं ॐ हर ३ महादेव ॥७॥ ध्यानं आरति समये हृद्ये इतिकृत्वाशिवहृद्ये० रामं त्रिजटा नाथं २ ईशं अभिनत्वा । संगीतमेवं प्रतिदिनपठनं यः कुरुते शिवपठनं० शिवसायुज्यं गच्छति २ भक्त्या यः शृणुते ॐ हर ३ महादेव ॥ ८ ॥ जय गङ्गाधर हर शिव जय गिरिजाधीश शिव जयगौरीनाथ त्वं मां पालय नित्यं त्वं मां पालय शम्भो कृपया जगदीश ॐ हर ३ महादेव ॥ ८ ॥

ॐ वन्दे देवमुमापतिं सुरगुरुम् वन्दे जगत् कारणं वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ॥ वन्दे सूर्यशशाङ्क वह्निनयनं वन्दे मुकुन्दप्रियं वन्दे भक्तजयनाश्रयश्च वरदं वन्दे शिवं शङ्करम् ॥ १ ॥ शान्तं पद्मासनस्थं शशिधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं शूलं वज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तं । नागं पाशश्च घण्टां डमरुकसहितं सांकुशं वामभागे नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥ २ ॥ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारं ॥ सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ ३ ॥ असित-गिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी ॥ लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति ॥ ४ ॥ त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ॥ त्वमेव विद्याद्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥ ५ ॥ करचरणकृतं

वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् ॥ विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्री महादेव शम्भो ॥ ६ ॥ चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ॥ दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमचलामन्यैस्तु किं कर्मभिः ॥ ७ ॥

इति शिवारातिः सम्पूर्णा ॥

हरिः ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् !

ॐ--यज्ञेन यज्ञ मयजन्त देवास्तानि धर्माणि प्रथमा न्यासन् । तेहनाकम्महिमानः--सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः ।

ॐ--राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय नमः ।

ॐ--विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् । सम्बाहुभ्यांधमति सम्पतत्रैर्द्यावा भूमी जनयन्देव एकः ॥

ॐ--नाना सुगन्ध पुष्पाणि यथा कालोद्भवानि च । पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥

॥ अथ पुष्पाञ्जलि-प्रारम्भः ॥

हरिः ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादा ऽक्षिशिरोरुबाहवे सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी-

युगधारिणे नमः ॥ १ ॥ विष्णु ब्रह्मेंद्र देवै रजत गिरि तटात्प्रार्थितो योऽवतीर्य शाक्याद्युद्दामकण्ठीरवनखरकराघातसञ्जात मूर्छाम् ॥ छंदोधेनुं यतींद्रः प्रकृतिमगमयत्सूक्तिपीयूषवर्षैः सोऽयं श्रीशङ्कराचार्यो भवदवदहनात्पातु लोकानजस्रम् ॥ २ ॥ पूर्णः पीयूषभानुर्भवमरुतपनोद्दामतापाकुलानां प्रौढाज्ञानान्धकारावृतविषमपथभ्राम्यतामंशुमाली ॥ कल्पः शाखी यतीनां विगतधनसुतादीषणानां सदा नः पायाच्छ्री पद्मपादादिम मुनि सहितः श्री मदाचार्यवर्यः ॥ ३ ॥ ब्रह्मानन्दं परम सुखदं केवलं ज्ञान मूर्तिं द्वन्द्वातीतं गगन सदृशं तत्त्वमस्यादि लक्ष्यम् ॥ एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ ४ ॥ नारायणं पद्मभवं वसिष्ठं शक्तिं च तत्पुत्र पराशरञ्च व्यासं शुकं गौड पदं महान्तं गोविंद योगींद्रमथास्य शिष्यम् । श्री शङ्कराचार्यमथास्य पद्मपादं च हस्तामलकञ्च शिष्यम् तंतोटकं वार्तिककारमन्यानस्मद् गुरून् संततमानतोऽस्मि ॥ ५ ॥ विश्वं दर्पण-दृश्यमान नगरी तुल्यं निजान्तर्गतं पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ॥ यः साक्षात्कुरुते प्रबोध समये स्वात्मानमेवाद्वयं तस्मै श्रीगुरुमूर्त्तये नम इदं श्रीदक्षिणामूर्त्तये ॥ ६ ॥ अखण्ड मण्डलाकारं व्याप्तं येन चराचरम् ॥ तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥ ७ ॥ गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ॥ गुरुः साक्षात्परमब्रह्म तस्मै श्रीगुरवेनमः ॥८॥ श्रुतिस्मृति पुराणानामालयं करुणालयं ॥ नमामि भगवत्

पादं शङ्करं लोकशङ्करं ॥ ९ ॥ शङ्करं शङ्कराचार्यं केशवं बादरायणम् ॥ सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ १० ॥ ईश्वरो गुरुरात्मेति मूर्त्तिभेदविभागिने ॥ व्योमवद् व्याप्त-देहाय दक्षिणामूर्त्तये नमः ॥ ११ ॥ हरि ॐ यज्ञेन यज्ञमय-जन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ॥ तेहनाकम्महिमा-नः सचंत यत्र पूर्वे साध्याः सन्ति देवाः ॥ १२ ॥ राजाधिरा-जाय प्रसह्यसाहिने ॥ नमो वयं वैश्रवणाय कुर्महे ॥ १३ ॥ स मे कामान् कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु ॥ १४ ॥ कुबेराय वैश्रवणाय महाराजाय नमः ॥ १५ ॥ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥१६॥

नाना सुगन्धपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥ १७ ॥

ॐ नमः शिवाय

अथ शिवमहिम्नः स्तोत्रम्

मङ्गलाचरणम्

गजाननं भूतगणाधिसेवितम्,
कपित्थजम्बूफलचारुभक्षणम् ॥
उमासुतं शोकविनाशकारकम् ।
नमामि विघ्नेश्वरपादपङ्कजम् ॥

ध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम्,
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्,
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥ २ ॥

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधिगृणन्
ममाप्येषस्तोत्रे हर निरपवादः परिकरः ॥ १ ॥

अन्वय--हे हर ! ते महिम्नः परं पारम् अविदुषः स्तुतिः यदि असदृशी तद् ब्रह्मादीनाम् अपि गिरः त्वयि अवसन्नाः अथ सर्वः स्वमतिपरिणामावधिगृणन् अवाच्यः मम अपि स्तोत्रे एषः परिकरः निरपवादः ॥ १ ॥

हे हर ! = त्रिविधसन्तापहारिन् !
ते = मायारहित निर्गुण तुम्हारी
महिम्नः = महिमा की
परम् = अन्तिम
पारम् = सीमा को
अविदुषः = न जानने वाले अपण्डित साधारण मनुष्य के द्वारा की गई।
स्तुतिः = स्तुति
यदि = यदि आपके
असदृशी = अयोग्य है। अर्थात् जैसी स्तुति होनी चाहिए वैसी नहीं हुई।
तद् = तब तो
ब्रह्मादीनाम् = ब्रह्मादि की
अपि = भी
गिरः = वाणी (स्तुति)
त्वयि = आप के विषय में
अवसन्नाः = अयुक्तही है क्योंकि वे भी तो तुम्हारी महिमा से अनभिज्ञ हैं
अथ = और यदि
सर्वः = सब कोई
स्वमति-परिणामा-वधि- = अपनी अपनी बुद्धि के बलानुसार
गृणन् = स्तुति करता हुआ
अवाच्यः = निर्दोष ही है अर्थात् स्वमत्यनुसार प्रार्थना करना दूषण नहीं है
मम = फिर तो मेरा
अपि = भी
स्तोत्रे = आपके इस स्तोत्र में
एषः = यह
परिकरः = यत्न अर्थात् स्तोत्र निर्माण का क्रम
निरपवादः = निन्दा रहित है किसीभी प्रकार की निन्दा के योग्य नहीं हो सकता।

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः,
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

अन्वय--हे भगवन्! तव च महिमा वाङ्मनसयोः पन्थानम् अतीतः यं श्रुतिः अपि अतद्व्यावृत्त्या चकितम् अभिधत्ते स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः अर्वाचीने-पदे तु कस्य मनः न पतति कस्य वचः न पतति (अपि तु पतत्येव) ॥ २ ॥

हे भगवन्! = बल, वैभव, यश श्री ज्ञान, वैराग्य युक्त भगवन्
तव = तुम्हारी,
च = तो
महिमा = महानता
वाङ्मनसयोः = मन और वाणी के
पन्थानम् = मार्ग 'विषय' से
अतीतः = पृथक है परे है
यम् = जिस, सच्चिदानन्दघन आप और आप की महिमाको
श्रुतिः = वेद
अपि = भी
अतद्व्यावृत्त्या = तटस्थ और स्वरूप लक्षण से साकार और निराकार रूप वर्णन करने में 'अध्यारोपापवादन्याय से' कुछ अयुक्त न हो जाय अत एव
चकितम् = अति-विस्मित होकर
अभिधत्ते = कथन करता है ।

आप में भेद-बाधक और अभेद-साधक श्रुतिसमन्वयको वेद भी चकित होकर कहता है और इस समन्वय के द्वारा आप को कोई ही समझता है नहीं तो भेद ही सब की बुद्धि का विषय है तथा भेद में दुःख है और

सः = वह परमात्मा

कतिविध-गुणः = कितने प्रकार के गुणोंवाला है इस प्रकार

कस्य = किस के

स्तोतव्यः = स्तुति करने योग्य और

कस्य = किस के ज्ञान का

विषयः = विषय है अर्थात् गुणातीत रूप से किसी की बुद्धि का विषय नहीं हो सकता फिर भी

अर्वाचीने = नव रचित

पदे = स्तोत्रादि में अथवा भक्त कल्याणकारी साकार आपके रूपमें

तु = तो

कस्य = किस के

मनः = चित्त और

वचः = वाणी

न पतति = नहीं रमते हैं ऐसा

न = नहीं, किन्तु मनोहर पदार्थ को मन और वाणी ग्रहण करते ही हैं

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः,
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥

अन्वय—हे ब्रह्मन्! मधुस्फीताः वाचः परम् अमृतम् निर्मितवतः तव किम् सुरगुरोः अपि वाक् विस्मयपदम् (धत्ते) अहम् तु एताम् वाणीम् हे पुरमथन! भवतः गुणकथनपुण्येन पुनामि इति अस्मिन् अर्थे मम बुद्धिः व्यवसिता ॥ ३ ॥

हे ब्रह्मन्! = हे त्रिलोकपते!
मधुस्फीताः = माधुर्य्यपूर्ण मधु से भी सुमधुर
परमम् = अत्यन्त
अमृतम् = अमृतस्वरूप तथा सब दोषों से रहित वेदों को
निर्मितवतः = निर्माण करने वाले
तव = (महामहिमशाली) सर्वज्ञ आपके लिये
किम् = क्या
सुरगुरोः = बृहस्पति की
वाक् = वाणी, (स्तुति)
अपि = भी
विस्मयपदम् = आश्चर्य कर सकती है क्योंकि सर्वोत्तम वेद वाणी को रचनेवाले तो आप हैं फिर मनुष्य या देव द्वारा की गई स्तुति क्या आश्चर्य कर सकती है तथाऽपि
हे पुरमथन = हे त्रिपुरारे!
अहम् = मैं
तु = तो
एताम् = इस अपनी
वाणीम् = वाणी को
भवतः = आप के
गुणकथन पुण्येन = गुण वर्णन के पुण्य से
पुनासि = पवित्र करता
इति = अत एव
अस्मिन् = आपके इस मोक्षप्रद स्तुति रूप
अर्थे = कार्य में
मम = मेरी
बुद्धिः = बुद्धि
व्यवसिता = प्रस्तुत हुई है

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्,
त्रयीवस्तु व्यस्तं तिसृषु गुणाभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं-
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥

अन्वय—हे वरद ! इह एके जड़धियः तव जगदुदयरक्षाप्रलयकृत् त्रयीवस्तु गुणभिन्नासु तिसृषु तनुषु व्यस्तम् ऐश्वर्यम् विहन्तुं अभव्यानाम् रमणीयाम् अस्मिन् 'सर्वं ज्ञत्वादिगुणे' अरमणीम् व्याक्रोशीं विदधते ॥ ४ ॥

हे वरद ! = हे वरदायिन् !
इह = इस संसार में
जड़धियः = जड़ बुद्धि
एके = कई नास्तिक मीमांसकादि व विधर्मी लोग
जगदुदयरक्षाप्रलयकृत = जगत् की सृष्टि स्थिति और प्रलयकारी तथा
गुणभिन्नासु = सत्त्व, रज, और तमो गुण के भेद से
तिसृषु = तीनों 'ब्रह्मा, विष्णु, रुद्र भेद वाले'
तनुषु = शरीरों में
व्यस्तम् = विभक्त हुए और
त्रयी वस्तु = वेद प्रतिपाद्य अर्थात् ऋग् यजु साम ये तीन वेद जिसे प्रतिपादन करते हैं ऐसे
तव = आप के
ऐश्वर्यम् = ऐश्वर्य को
विहन्तुम् = खण्डन करने के लिये
अभव्यानाम् = पापियों को
रमणीयाम् = सुन्दर प्रतीत होने वाली और
अस्मिन् = सर्वज्ञत्वादि के प्रतिपादन करने में

अरमणीम् = निन्दित (बुरी) अर्थात् दुष्टों के लिये मनोहर और सर्वज्ञत्वादि आपके स्वरूप प्रतिपादन करने में कुण्ठित ऐसी २

व्याक्रोशीम् = कुकल्पनाओं को

विदधते = किया करते है सच है कि मायाने सबको मोहित कर रखा है आप के भक्त ही इस सर्वमोहिनी माया को पार करते हैं।

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनम्,
किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः,
कुतर्कोऽयं कांश्चिन् मुखरयति मोहाय जगतः॥५॥

अन्वय—स खलु धाता किमाधारः किमीहः किंकायः किमुपायः किमुपादानः सन् त्रिभुवनम् सृजति इति अयम् कुतर्कः अतर्क्यैश्वर्ये त्वयि अनवसरदुःस्थः हतधियः कांश्चित् जगतः मोहाय मुखरयति ॥ ५ ॥

(और हे आशुतोष)

सः = वह
धाता = ब्रह्मा
खलु = निश्चय ही
किमाधारः = कहां बैठकर और
किमीहः = किस इच्छा को लेकर
किंकायः = किस देह और
किमुपायः = कौन उपाय तथा
किमुपादानः = किन कारणों से अर्थात् किन वस्तुओं से तथा किस के लिये

त्रिभुवनम् = इस ब्रह्माण्ड को
सृजति = उत्पन्न करते हैं
इति = ऐसा
अयम् = यह
कुतर्कः = कुतर्क
अतर्क्यैश्वर्ये = अनिर्वचनीय षड् ऐश्वर्य वाले अर्थात् कुतर्क का अविषय और श्रद्धा का विषय है ऐश्वर्य जिनका ऐसे
त्वयि = आप में
अनवसर-दुस्थः = सावकाश न होकर (डामाडोल)
जगतः = संसार को
मोहाय = मोहने के लिये
हतधियः = मूढ बुद्धि
कांश्चित् = किन्हीं चार्वाक आदियों को और बुद्धिवादि आधुनिक मूर्खों को
मुखरयति = वाचालतया भ्रम में डालता है

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरः;
यतो मन्दास्त्वां प्रत्यमर वर संशेरत इमे ॥ ६ ॥

अन्वय—हे अमरवर ! अवयववन्तः अपि लोकाः किम् अजन्मानः (अपि तु न) भवविधिः जगताम् अधिष्ठातारम् अनादृत्य किम् भवति (अपि तु न) वा अनीशः कुर्यात्, (तदा) भुवनजनने कः परिकरः यतः 'कारणतः' इमे मन्दाः त्वाम् प्रति संशेरते ॥ ६ ॥

हे अमरवर ! = हे सुरवर !
इमे = ये
लोकाः = भू आदि लोक
अवयववन्तः=अवयव वाले अनेक (स्थूल होने पर)
अपि = भी
किम् = क्या
अजन्मानः = अजन्मा है अर्थात् क्या संसार जन्म स्थिति और संहार से रहित है और
किम् = क्या
भवविधिः = जगत की उत्पत्ति आदि का आरम्भ
जगताम् = सम्पूर्ण जगत के
अधिष्ठातारम् = किसी कर्ता को
अनादृत्य = न मान करके
भवति = हो सकता है कभी भी कर्ता के विना संसार नहीं हो सकता और
वा = यदि
अनीशः = बिना ईश्वर के ही कोई संसार को
कुर्यात् = उत्पन्न करता है तो
भुवनजनने = चतुर्दश भुवनोंकी उत्पत्ति में ईश्वर के अतिरिक्त
कः = कौन कर्ता और
परिकरः = कौन सी सामग्री है
यतः = जिस कारण से
मन्दाः = अति मूढ बुद्धि वाले
त्वाम् = आप के
प्रति = विषय में
संशेरते = शंकायें करते हैं

जिस के द्वारा संसार उत्पन्न होता है ईश्वर से पृथक कोई भी कर्ता वा सामग्री नहीं जिस से जगत् उत्पन्न हो सके क्योंकि परमात्मा के बिना जगत् उत्पन्न नहीं हो सकता। अतः अनेक भेदों से युक्त इस संसार का कर्ता परमात्मा है फिर भी यदि लोग शंका करें तो उनके मन्द भाग्य ही हैं।

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति,
प्रभिन्ने प्रस्थाने परमिद मदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजषाम्,
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥

अन्वय--त्रयी सांख्यम् योगः पशुपतिमतम् वैष्णवम् इति प्रस्थाने प्रभिन्ने इदम् परम् अदः पथ्यम् इति च रुचीनाम् वैचित्र्याद् ऋजुकुटिलनानापथजुषाम् नृणाम् एकः पयसाम् अर्णवः इव त्वम् गम्यः असि ॥ ७ ॥

त्रयी = तीनों वेद (ऋग्, यजु साम)
सांख्यं = सांख्यं शास्त्र
योगः = योग शास्त्र
पशुपतिमतम् = शैवमत पशुपतिशास्त्र
वैष्णवम् = वैष्णव मत
इति = इत्यादि
प्रभिन्ने = अनेक मत
प्रस्थाने = मतान्तरोंके विद्यमान रहने पर इनमें कोई सरल और कोई कठिन, अर्थात् किसी के द्वारा साक्षात् और किसी से परस्परया ब्रह्मप्राप्ति होती है । फिर भी
इदम् = यह
परम् = श्रेष्ठ (मोक्षदायक) है और
अदः = वह मार्ग
पथ्यम् = सरल है
इति = इस प्रकार मनुष्यों की
रुचीनाम् = अपनी २ रुचि की
वैचित्र्यात् = विचित्रता से
ऋजुकुटिल-नानापथ-जुषाम् = सीधे टेढ़े नाना मार्गों के अनुयायी
नृणाम् = मनुष्यों के लिये

पयसाम् = जलों को
अर्णवः = समुद्रप्राप्ति के
इव = समान
एकः = एक
त्वम् = आप ही
गम्यः = प्राप्त करने योग्य
असि = हो ॥ ७ ॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः,
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहिताम्,
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८ ॥

अन्वय—हे वरद ! महोक्षः खट्वाङ्गम् परशुः अजिनम् भस्म फणिनः कपालम् च इति इयत् तव तन्त्रोपकरणम् सुराः भवद्भ्रूप्रणिहिताम् ताम् ताम् ऋद्धिम् विदधति (तु) हि स्वात्मारामम् विषयमृगतृष्णा न भ्रमयति ॥ ८ ॥

हे वरद ! = हे मोक्षद !
महोक्षः = महावृष बूढ़ा बैल (बाहन)
खट्वाङ्गम् = खाट का पाया
परशुः = कुठार 'फरसा'
अजिनम् = व्याघ्रचर्म (कटीवस्त्र)
भस्म = भस्म 'चिताकी राख' (उबटन)
फणिनः = सर्प (शरीरभूषण)
च = और
कपालम् = नरकपाल 'मनुष्य की खोपड़ी
इति = यह उपरोक्त
इयत् = इतनी सामग्री
तव = आपके भोगोपयोगी
तन्त्रोपकरणम् = प्रधान सम्पदा है अर्थात् यह आप का धन है, तो भी
सुराः = सब देवता

भवद्भ्रू-प्रणि-हिताम् = आपकी कृपादृष्टिसे प्राप्त हुई
ताम्-ताम् = उस उस
ऋद्धिम् = स्वर्ग राज्य रूपी सम्पत्ति का
विदधति = उपभोग करते हैं, यह आश्चर्य की बात है, कि आप वैराग्य सामग्री वाले है, और भक्तों को सब कुछ प्रदान करते हैं.
हि = निश्चय से इन्द्रादिओं को उपभोग देने वालेभी स्वयं उपभोग नहीं करते यह ठीक ही है, क्योंकि
स्वात्मारामम् = स्वस्वरूप में स्थित आप को
विषयमृग-तृष्णा = रूपरसादिविषयों की मृग तृष्णा
न = नहीं
भ्रमयति = भ्रमा सकती ।

ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदम्,
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव,
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९

अन्वय—हे पुरमथन ! कश्चित् सकलम् इदम् सर्वं जगत् ध्रुवम् गदति तु (पुनः) अपरः अध्रुवम् 'गदति', परः ध्रौव्याध्रौव्ये 'गदति' समस्ते अपि एतस्मिन् जगति व्यस्तविषये 'अहम्' तैः विस्मितः इव त्वाम् स्तुवन् न जिह्रेमि 'एवं सत्यपि' ननु मुखरता धृष्टा खलु तु धृष्टैव ॥ ९ ॥

हे पुरमथन ! = हे त्रिपुरारे !
कश्चित् = सांख्यमतानुयायी नह्य सत उत्पत्तिः के अनुसार
सर्वम् = चराचररूप
इदम् = इस
सकलम् = सम्पूर्ण ब्रह्माण्ड को
ध्रुवम् = नित्य अविनाशी
गदति = कहते हैं
तु = और
अपरः = बौद्ध
अध्रुवम् = नश्वर कहते हैं तथा
परः = नैयायिक
ध्रौव्याध्रौव्ये = नश्वर और अविनाशी दोनों ही रूप मानते हैं
एतस्मिन् = इन
समस्ते = सब बौद्धादियों की बुद्धि
अपि = तो
जगति = संसार के
व्यस्तविषये = उलटे विषयों में फँसी है और मैं तो
तैः = उन बौद्धादियों के कथनों के द्वारा
विस्मितः = आश्चर्य युक्त
इव = सा हो कर
त्वाम् = आप की
स्तुवन् = स्तुति करता हुआ
जिह्रेमि = लज्जित
न = नहीं होता हूँ
ननु = निश्चय यह मेरी
मुखरता = चंचलता
खलु = ही
धृष्टा = ढीठ बना रही है और लज्जा को जगह नहीं ॥९॥

तवैश्वर्यं यत्नाद् यदुपरि विरञ्चिर्हरिरधः,
परिच्छेत्तुं यातावनलमनिलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्याम् गिरिश यत्,
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अन्वय—हे गिरिश ! अनलम् अनिल (अनल) स्कन्ध-वपुषः तव यत् ऐश्वर्यम् तत् यत्नात् परिच्छेत्तुम् उपरि विरञ्चिः अधः हरिः यातौ ततः भक्तिश्रद्धाभरगुरुगृणद्भ्याम् ताभ्याम् स्वयम् तस्थे तव अनुवृत्तिः किम् न फलति (अपि तु फलत्येव) ॥ १० ॥

हे गिरिश ! = हे कैलासवासिन् !

अनिल स्कन्धवपुष = वायु आदि विभिन्न शाखाओं से युक्त अर्थात् विराट् देह को धारण करने वाले

तव = आप का देशकाल और वस्तुकृत परिच्छेदों से रहित

यत् = जो

अनलम् = अग्निमय अण्डाकार

ऐश्वर्यं = ऐश्वर्य है

तत् = उस को

यत्नात् = प्रयास से

परिच्छेत्तुम् = जानने के लिए

उपरि = ऊपर के भाग में

विरञ्चिः = ब्रह्मा और

अधः = नीचे पाताल में

हरिः = विष्णु भगवान्

यातौ = गये परन्तु पार नहीं पाकर

ततः = उस हठ को छोड़

भक्ति-श्रद्धाभर-गुरुगृण-द्भ्याम् = भक्ति श्रद्धा के भार से नम्र होकर स्तुति करते हुए

ताभ्याम् = उन दोनों ने

स्वयम् = स्वयम

तस्थे = विराम किया आप के चरणों में नम्रता पूर्वक खड़े हो, स्तुति की, तब तुमने उनको अपने स्वरूपका ज्ञान कराया, हे शंकर !

तव = आप की

अनुवृत्तिः = भक्तिपूर्वक की हुई सेवा

किम् = क्या

न = नहीं

फलति = फलती किन्तु सब कुछ फल देती है।

अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरम्,
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः,
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥११

अन्वय--हे त्रिपुरहर ! दशास्यः यत् अयत्नात् अवैरिव्यतिकरम् त्रिभुवनम् आसाद्य (आपाद्य) रणकण्डूपरवशान् बाहून् अभृत तत् इदम् शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायाः त्वद्भक्तेः विस्फूर्जितम् आस्ति ॥ ११ ॥

हे त्रिपुहर ! = हे त्रिपुरनाशक !
यत् = जो कि
दशास्यः = दशवदन रावण ने
अयत्नात् = यत्न के बिना ही
अवैरिव्यतिकरम् = निष्कण्टक
त्रिभुवनम् = तीनों लोकों को
आसाद्य = बना करके
रणकण्डूपरवशान् = रण करने के लिये खुजलाती हुई
बाहून् = भुजाओं को
अभृत = धारण किया अर्थात् स्वच्छन्द विचरा
तत् = इस लिये

इदम् = यह सब
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः = स्वशिर रूप कमलों की माला बना कर आप के चरणों में समर्पण है जिस में ऐसी
स्थिरायाः = स्थायी
त्वद्भक्तेः = आपकी भक्तिका ही
विस्फूर्जितम् = प्रभाव है जो कि उसने सारे संसार पर निष्कण्टक राज्य किया ॥११॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनम्,
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि,
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥ १२

अन्वय–त्वदधिवसितौ कैलासे अपि त्वत्सेवासमधिगतसारम् भुजवनम् बलात् विक्रमयतः अमुष्य त्वयि अलसचलितांगुष्ठ-शिरसि पाताले अपि प्रतिष्ठा अलभ्या आसीत् ध्रुवम् उपचितः खलः मुह्यति ॥ १२ ॥

हे भगवन् ! = हे भगवन् !
त्वदधिवसतौ = आपकी निवास भूमि
कैलासे = कैलास पर
अपि = भी
त्वत्सेवा-समधि-गतसारम् भुजवनम् = तुम्हारी सेवा के द्वारा प्राप्त सार-वाली भुजाओं की शक्ति को
बलात् = अभिमान से
विक्रमयतः = अजमाते हुए
अमुष्य = उस रावण को
त्वयि = आप के द्वारा
अलसच-लिताङ्गुष्ठ शिरसि = आलस्य पूर्वक च-लाये गये अँगूठा के अगले भागद्वा-रा दबाये पर्वत के भार से दुखी होना पड़ा और उसे
पाताले = पाताल में
अपि = भी
प्रतिष्ठा = स्थिरता (जगह)
अलभ्या = नहीं प्राप्त हुई
आसीत् = थी क्योंकि
ध्रुवम् = यह निश्चय है कि
खलः = दुष्ट (ओछा)
उपचितः = उन्नति पाकर
मुह्यति = मोह में फस जाता है और बल का दुरुप-योग करता है तथा उपकार को भूल जाता है ।

शंकरसेवा से ही बल प्राप्त कर रावण कैलासको उखाड़ने लगा उस के दुष्ट भाव को जान, भगवानने अपने अंगूठा को दबाया और उसका मान चूर किया उससे घबरा कर शान्ति के लिये भागे रावण को मर्त्य और स्वर्ग में तो क्या पाताल में भी स्थान न मिला। बड़ाई पाकर इतराने का फल यही है। ॥ १२ ॥

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीं,
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३

अन्वय—वरद! परिजनविधेयःत्रिभुवनः बाणः परमोच्चैः अपि सतीम् सुत्राम्णः ऋद्धिम् अधः चक्रे तत् त्वच्चरणयोः वरिवसितरि तस्मिन् न चित्रम् त्वयि, शिरसः अवनतिः कस्य अपि उन्नत्यै न भवति (अपि तु भवत्येव) ॥ १३ ॥

हे वरद ! = हे आशुतोष !
परिजन-विधेय त्रिभुवनः = त्रिलोकी को आज्ञाकारी सेवक बनाने वाले वीर
बाणः = बाणासुर ने
परमोच्चैः = बहुत बढ़ी
सतीम् = हुई
अपि = भी
सुत्राम्णः = इन्द्र की
ऋद्धिम् = सम्पत्ति को
अधः = नीचे
चक्रे = कर दिया
तत् = वह सब कार्य
त्वच्चरणयोः = आपके चरणों के सेवा भाव से
वरिवसितरि = पूजने वाले बाणासुर के लिये
चित्रम् = अचम्भा
न = नहीं है क्योंकि
त्वयि = आपको

शिरसः = सिर से किया गया
अवनतिः = प्रणाम
कस्य = किसकी
उन्नत्यै = उन्नति के लिये
न = नहीं
भवति = होता, अपितु होता ही है ॥१३॥

हे शम्भो ! जो तुम्हारे चरणों में विनीत भावसे मस्तक रखता है उसकी इहलोक और परलोक की उन्नति अवश्यमेव होती है। ॥ १३ ॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो,
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः॥१४॥

अन्वय—हे त्रिनयन ! अकाण्डब्रह्माण्डक्षयचकितदेवासुर कृपाविधेयस्य विषं संहृतवतः तव कण्ठे यः कल्माषः आसीत् सः 'किम्' तव श्रियम् न कुरुते (इति न अपि तु कुरुत एव) अहो (इति आश्चर्यम्) भुवनभयभङ्गव्यसनिनः विकारः अपि श्लाघ्यः भवति ॥ १४ ॥

त्रिनयन ! = हे त्रिनेत्र ! विष से
अकाण्ड-ब्रह्माण्ड-क्षयचकितदेवासुरकृपा-विधेयस्य = असमय में संसार के नाश से भयभीत देवता और दानवों पर कृपा करके एवं प्राणीमात्र के कल्याणके लिए
विषम् = समुन्द्रोत्पन्नविष को
संहृतवतः = पीने वाले
तव = आप के
कण्ठे = गले में विष का
यः = जो
कल्माषः = नीला चिह्न हुआ था
सः = वह चिह्न
किम् = क्या आपकी
श्रियम् = शोभा को

न = नहीं
कुरुते = बढ़ाता किन्तु बढ़ाता ही है और
अहो = ठीक भी है क्योंकि
भुवनभय-भङ्गव्यसनिनः = संसार के भय का नाश करने में लगे हुए महापुरुषों का
विकारः = विकार
अपि = भी
श्लाघ्यः = प्रशंसनीय हुआ करता है अर्थात् उपकारी के दूषण भी भूषण समझे जाते हैं ॥ १४ ॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे,
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्,
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥ १५

अन्वय—हे ईश ! यस्य विशिखाः सदेवासुरनरे जगति नित्यम् असिद्धार्थाः क्वचिद् अपि न एव निवर्तन्ते सः स्मरः इतरसुरसाधारणम् त्वाम् पश्यन् स्मर्तव्यात्मा अभूत 'युक्तम् एतत्' वशिषु परिभवः पथ्यः न भवति ॥ १५ ॥

हे ईश ! = हे सर्वेश्वर !
यस्य = जिस कामदेव के
विशिखाः = तीक्ष्ण बाण
सदेवासुरनरे = देव दानव और मनुष्यों से पूर्ण
जगति = संसार भर में
नित्यम् = सदा
क्वचिद् = कहीं पर
अपि = भी
असिद्धार्थाः = निरर्थक होकर
निवर्तन्ते = लौटते
एव = ही

न = न थे अर्थात् सवदा विजयी रहा
सः = उस
एव = ही
स्मरः = काम ने
त्वाम् = आप को
इतरसुरसा = सामान्य देव
धारणम् = ता मन में
पश्यन् = समझ कर देवों के कहने से आप की समाधि में विघ्न किया और वह
स्मर्तव्यात्मा = मृत्यु को प्राप्त
अभूत् = हुआ अतः
अहो = यह सत्य है कि
वशिषु = जितेन्द्रियों का
परिभवः = तिरस्कार करना
पथ्यः = हितकर
न = नहीं—
भवति = होता है ॥ १५ ॥

मही पादाघाताद् व्रजति सहसा संशयपदम्,
पदंविष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा,
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥

अन्वय—हे नटवर ! यदा त्वम् जगद्रक्षायै नटसि तदा पादाघाताद् मही सहसा संशयपदम् व्रजति विष्णोः पदम् भ्राम्यद् भुजपरिघरुग्णग्रहगणम् 'भवति' अनिभृतजटाताडिततटा द्यौः दौस्थ्यम् याति ननु 'इति निश्चयेन भवतः' विभुता वामा एव १६

यदा = हे देवदेव ! जिस समय
त्वम् = 'तुम' दैत्योंको मोहकर
जगद्रक्षायै = जगत की रक्षा के लिए
नटसि = नृत्य करते हो
तदा = उस समय तुम्हारे
पादाघातात् = पांव के आघात से

मही = पृथ्वी
सहसा = अचानक
संशयपदम् = कांपने (धसने)
व्रजति = लग जाती है,
विष्णोः = विष्णु के
पदम् = पद आकाश में
भ्राम्यद्-भुजपरिघ रुग्णग्रह-गणम् = घूमती वज्ररूपी भुजाओं की रगड़ से ग्रह समूह घूम जाता है। और
अनिभृत-जटाताडि-ततटा = खुली हुई जटा-ओंसे ताडित हो कर
द्यौः = स्वर्ग भी
मुहुः = बारम्बार
दौस्थ्यम् = कम्पायमान
याति = हो जाता है
ननु = निश्चय ही यह सिद्ध होता है कि आप की
विभुता = लीला
वामा = टेढ़ी
एव = ही है महान के लिये अल्प का बलिदान हुआ ही करता है ॥ १६ ॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः,
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिमदिव्यं तव वपुः ॥ १७ ॥

अन्वय—हे भगवन् ! वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः यः वाराम् प्रवाहः ते शिरसि पृषतलघु दृष्टः तेन जगत् जलधिवलयम् द्वीपाकारम् कृतम् हे धृतमहिम ! इति अनेन एव दिव्यम् तव वपुः उन्नेयम् ॥ १७ ॥

वियद्व्यापी = हे महादेव! आकाश में विस्तृत और
तारागणगुणितफेनोद्गमरुचिः = तारोंके समूह द्वारा दूने किये फेनों से अत्यधिक शोभायमान
यः = जो
वाराम् = जल का
प्रवाहः = प्रवाह
ते = वह आप के
शिरसि = शिर में
पृषतलघुदृष्टः = छोटी जल बूंद के समान देखने में आया और
तेन = उस ने ही
जगत् = संसार को
जलधिवलयम् = सागर रूपी कंकण से घेर कर
द्वीपाकारम् = जम्बू द्वीपादि सात भागों में विभक्त कर
कृतम् = दिया
धृतमहिम! = हे शिव
इति = इस
अनेन = से ही
तव = आप का
दिव्यम् = सच्चिदानन्दघन
वपुः = शरीर
उन्नेयम् = अनुमान करने योग्य है कि आप अनन्त हैं ॥ १७ ॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो,
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥१८॥

अन्वय—भूतेश! त्रिपुरतृणम् दिधक्षोः ते अयम् आडम्बरविधिः कः (कोऽसौ) रथः क्षोणी यन्ता शतधृतिः अगेन्द्रः

धनुः चन्द्राकौं रथांगे रथचरणपाणिः शरः इति 'अहो युक्तम् एतत् खलु विधेयैः क्रीडन्त्यः प्रभुधियः न परतन्त्राः भवन्ति ॥१८॥

त्रिपुरतृणम् = हे आशुतोष! त्रिपुर को घास क समान
दिधक्षोः = जलाने वाले
ते = तुम को
अयम् = यह निम्न लिखित
आडम्बर-विधिः = बखेड़ा करने की
कः = क्या जरूरत थी
क्षोणी = जोकी आपने भूमि का
रथः = रथ
शतधृतिः = ब्रह्मा को
यन्ता = सारथी
अगेन्द्रः = हिमालय को
धनुः = धनुष —
रथाङ्गे = रथ के पहिये
चन्द्राकौं = चन्द्र सूर्य को
अथो = और
रथचरण-पाणिः = विष्णु भगवान् को
शरः = जहरीलावाण बनाया
इति = इत्यादि से यह ज्ञात होता है कि
विधेयैः = स्वरचित पदार्थों से
क्रीडन्त्यः = खेलती हुई
प्रभुधियः = सर्वज्ञों की वुद्धियाँ
परतन्त्राः = पराधीन
खलु = निश्चय ही
न = नहीं हुआ करती ॥ १८ ॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा-
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

अन्वय—हे त्रिपुरहर ! हरिः ते पादयोः साहस्रम् कमलबलिम् आधाय 'भवन्तमर्चितुमुपस्थितः' तस्मिन् एकोने (सति) निजम् नेत्रकमलम् (यद्) यदा उदहरत् असौ भक्त्युद्रेकः चक्रवपुषा परिणतिं गतः (सन्) त्रयाणाम् जगताम् रक्षायै जागर्ति अद्यापीति शेषः ॥ १९ ॥

हे त्रिपुरहर ! = हे त्रिपुरारे !
हरिः = भगवान् विष्णु
ते = आप के
पादयोः = चरणों में
साहस्रम् = एक हजार
कमलबलिम् = कमलों की भेट को
आधाय = लेकर प्रतिदिन पूजा करते थे एक दिन
तस्मिन् = उन में से
एकोने = एक कम होने पर
निजम् = स्वकीय
नेत्रकमलम् = नेत्र कमल को
यदा = जब उन्होंने तुम्हारे
उदहरत् = चरणों में चढाया, तब से
असौ = वह
भक्त्युद्रेकः = भक्ति का आवेश
चक्रवपुषा = सुदर्शन चक्र रूप
परिणतिम् = परिणाम को
गतः = प्राप्त हुआ, और
त्रयाणाम् = तीनों
जगताम् = लोकों की
रक्षायै = रक्षाके लिए आजभी
जागर्ति = विद्यमान है एक द्वारा अनुष्ठित भक्ति का फल अनेकों के लिए सुखप्रद होता है

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमताम्;
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं-
श्रुतौ श्रद्धां बध्द्वा दृढपरिकरः कर्मसु जनः ॥२०॥

अन्वय—जनः श्रुतौ श्रद्धां बध्द्वा पुनः क्रतुषु फलदानप्रति-भुवम् त्वाम् सम्प्रेक्ष्य कर्मसु दृढपरिकरः (वर्तते) कुतः यतः क्रतौ सुप्ते फलयोगे (सति) त्वम् जाग्रत् असि अतः क्रतुमताम् प्रध्वस्तम् कर्म पुरुषाराधनम् ऋते क्व फलति अपि तु कदा अपि न फलति ॥ २० ॥

= हे ईश !
जनः = मनुष्य
श्रुतौ = वेदों में
श्रद्धाम् = विश्वास
बध्द्वा = करके पुनः
क्रतुषु = यज्ञों में
फलदान-प्रतिभुवम् = फल के विश्वास-स्थानभूत
त्वाम् = तुम को
संप्रेक्ष्य = देख समझ कर ही
कर्मसु = कर्मों में
दृढपरिकरः = दृढ विश्वास पूर्वक लग जाते हैं क्योंकि
क्रतौ = क्रियारूप यज्ञों की
सुप्ते = समाप्ति में भी
त्वम् = आप कर्ता को
फलयोगे = फल प्राप्ति के लिये
जाग्रत् = जागते रहते
असि = और फल देते हो
अतः = अत एव
क्रतुमताम् = याज्ञिकों का
प्रध्वस्तम् = अनेक त्रुटियों से पूर्ण
कर्म = कर्म
पुरुषाराधनम् = परमेश्वर के आराधन के
ऋते = बिना
क्व = किस प्रकार यहां सफल
फलति = हो सकता है

क्रियादक्षो दक्षः क्रतुपतिरधीश स्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो-
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

अन्वय—हे शरणद ! दक्षः क्रियादक्षः तनुभृताम् अधीशः क्रतुपतिः ऋषीणाम् आर्त्विज्यम् सदस्याः सुरगणाः (एवं सामग्रिकस्याऽपि दक्षस्य) क्रतुफलविधानव्यसनिनः त्वत्तः क्रतुभ्रंशः (जातः) ध्रुवम् कर्तुः क्रियाविधुरम् (यदा भवति तदा) मखाः अभिचाराय हि भवन्तीति शेषः ॥ २१ ॥

हे शरणद ! = हे शरणागत-पालक !
क्रियादक्षः = यज्ञ क्रिया में निपुण और
तनुभृताम् = देहधारियों का
अधीशः = सम्राट्
दक्षः = दक्ष प्रजापति तो
क्रतुपतिः = यजमान
ऋषीणाम् = त्रिकालज्ञ भृगुवशिष्ठादि ऋषिगण
आर्त्विज्यम् = ऋत्विज तथा
सुरगणाः = ब्रह्माविष्णु आदि देव गणयज्ञसाक्षी
सदस्याः = सभासद थे तो भी
क्रतुफल-विधान-व्यसनिनः = यज्ञ कर्म फल प्रदान के पूरे अभ्यासी कर्माध्यक्ष
त्वत्तः = आप के द्वारा ही
क्रतुभ्रंशः = दक्षयज्ञ विनाश हुआ
ध्रुवम् = यह सत्य है क्यों कि
कर्तुः = यज्ञ कर्ता की आप में
श्रद्धाविधुरम् = श्रद्धा के विना किये
मखाः = यज्ञ नष्ट या
अभिचाराय = विपरीत फल-दायक
हि = ही हुआ करते हैं

यज्ञफल प्रदाता भगवान् में श्रद्धा न हो और यज्ञ किया जाय तो वह तामस यज्ञ नष्ट भ्रष्ट हो कर यजमान का विनाश ही करता है ।

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं,
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।

धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुम्,
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२

अन्वय—हे नाथ! धनुष्पाणेः ते मृगव्याधरभसः रोहिद्भूताम् स्वाम् दुहितरम् ऋष्यस्यवपुषा प्रसभम् रिरमयिषुम्(अथ च) गतम् अभिकम्(तथा) सपत्राकृतम् दिवम् अपि यातम् (एवम्) त्रसन्तम् अमुम्-प्रजानाथम् (प्रजापतिम्) अद्य अपि न त्यजति 'आचारहीनं न पुनन्ति वेदा इत्यर्थः' ॥ २२ ॥

नाथ = हे स्वामिन्
धनुष्पाणेः = धनुर्धारी
ते = तुम्हारे
मृगव्याधरभसः = मृग व्याध के रूपका पराक्रम कामातुर ब्रह्मा को देख कर लज्जा से
रोहिद्भूताम् = मृगी बनी हुई और भय से दौडती
स्वाम् = अपनी ही
दुहितरम् = कन्या के साथ
ऋष्यस्य = मृग का
वपुषा = शरीर धर के
प्रसभम् = बलपूर्वक
रिरमयिषुम् = रति के अभिलाषी
गतम् = और उस के पीछे दौडते हुए
सपत्राकृतम् =आप के द्वारा छोडे आर्द्रारूप वाण से व्याकुल
अभिकम् = घृणित कार्य में तत्पर तथा
दिवम् = स्वर्ग में
अपि = भी
यातम् = जाकर
त्रसन्तम् = भयभीत
अमुम् = उस मृगशिरा नक्षत्र रूप
प्रजानाथम् = ब्रह्मा को
अद्य = आज
अपि = भी
न = नहीं
त्यजति = छोडता है।

कुपथगामी ब्रह्मा का शासन आप ने ही किया और लोक मर्यादा बांधी आप की लीला अपार तथा अचिन्त्य है। वह चित्र आज भी कुपथपर नहीं चलने की शिक्षा देता है। ॥२२॥

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्,
पुरः प्लुष्टं दृष्ट्वा पुरमथनपुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरत देहार्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः॥२३॥

अन्वय—हे पुरमथन! यमनिरत! स्वलावण्याशंसा धृतधनुषम् पुष्पायुधम् अह्नाय तृणवत् पुरः प्लुष्टम् दृष्ट्वा अपि देवी देहार्द्धघटनात् त्वाम् अद्धा स्त्रैणम् अवैति बत अहो वरद! युवतयः मुग्धाः भवन्ति॥ २३॥

पुरमथन! = हे पुरदाहक!
यमनिरत! = अष्टाङ्गयोगाचार्य!
स्वलावण्याशंसा = अपनी या गौरी की सुन्दरताकी आशा से आपको जीतने के लिये आये
धृतधनुषम् = धनुषधारी लोक-विजयी
पुष्पायुधम् = कामदेव को
पुरः = अपने सामने
अह्नाय = अतिशीघ्र
तृणवत् = घास के तुल्य
प्लुष्टम् = भस्मीभूत
दृष्ट्वा = देख कर
अपि = भी
देवी = पार्वती
देहार्द्धघटनात् = देह के वाम भाग में बैठने के कारण
त्वाम् = आपको
अद्धा = प्रत्यक्षरूप से
स्त्रैणम् = स्त्रीपरायण (लंपट)
अवैति = समझती है,
वरद = हे वरदायक
यह आश्चर्य की बात ही कौनसी है क्योंकि

बत = प्रायः
युवतयः = स्त्रियाँ
मुग्धाः = भोली भाली और मूर्ख हुआ करती हैं

स्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटी परिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं,
तथाऽपि स्मर्तॄणां वरद परमं मङ्गलमसि ॥ २४ ॥

अन्वय—स्मरहर ! स्मशानेषु आक्रीडा तथा पिशाचाः सहचराः चिताभस्म आलेपः नृकरोटी स्रग् अपि इति एषः ते परिकरः हे वरद ! एवम् अखिलम् अमङ्गल्यम् तव शीलम् भवतु नाम तथा अपि स्मर्तॄणाम् परमम् मङ्गलम् असि ॥२४॥

स्मरहर ! = हे मदनान्तक !
स्मशानेषु = मृतक जलाने के स्थान पर
तव = आप की
आक्रीडा=केली(खेल)मांसभोजी
पिशाचाः = भूत प्रेत साथ के
सहचराः = खेलनेवाले सेवक
चिताभस्म = जले हुए मुरदों की राख
आलेपः = शरीर लेपन
अपि = और
नृकरोटी = मनुष्य के कपालों की
स्रग् = कण्ठ माला इत्यादि तो आपकी
परिकरः = सामग्री है यानी अशुभ वस्तुसंग्रह है
वरद ! = हे वरप्रद !
अखिलम् = आप का सम्पूर्ण
शीलम् = यह चरित
अमंगलम् = अमंगल
भवतु नाम = हो भले
एव = ही

तथा = तो
अपि = भी आप के भूतेश ईशान स्मशान वासी आदि नाम
स्मर्तॄणाम् = स्मरण करने वालों के लिए तुम
परमम् = अत्यधिक
मंगलम् = कल्याणकारी
असि = हो ही

हे प्रभो ! तुम अपने भक्त गण का सर्व प्रकार मंगल करते हो यही तो आप की अद्भुत महिमा है ॥ २४ ॥

मनः प्रत्यक्चित्ते सविधमभिधायात्तमरुतः,
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये,
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान्॥ २५

अन्वय—[हे शूलपाणे] आत्तमरुतः प्रहृष्यद्रोमाणः प्रमद-सलिलोत्संगितदृशः यमिनः प्रत्यक् मनः चित्ते सविधम् (यथा स्यात् तथा) अभिधाय अन्तः यत् (अनिर्वचनीयतत्त्वम्) आलोक्य आह्लादम् दधति (यथा) अमृतमये ह्रद इव निमज्ज्य तत् तत्त्वम् भवान् किल (अथवा तत् किल भवान् त्वम्) असि ॥ २५ ॥

अमृतमये = हे शम्भो ! अमृत जल से भरे हुये
ह्रदे = सरोवर (तालाब) में
इव = जिस प्रकार
निमज्ज्य = स्नान करके सूर्यके तापसे तपे हुये मनुष्य सुखी होते हैं उसी
आत्तमरुत्तः = प्रकार प्राणायाम

द्वारा प्राणवायुको निरोध कर, और
प्रहृष्यद्रोमाणः = रोमांचित हुये एवं
प्रमदसलिलोत्संगित दृशः = भक्ति के प्रेमाश्रुओं से पूर्ण नेत्रों वाले
यमिनः = योगी लोग
प्रत्यक् = बाह्य (चंचल)
मनः = मन को
चित्ते = हृदयाकाश में गुरु द्वारा प्राप्त
सविधम् = शास्त्रोक्त विधि से
अभिधाय = रोक कर के
अन्तः = आत्मा में ही
यत् = जिस
किम् = किसी
अपि = भी अनिर्वचनीय परमतत्त्व को अभेद से
आलोक्य = देख कर के
आह्लादम् = परमानन्द को
दधति = प्राप्त होते हैं वह
तत् = शुद्ध ब्रह्मतत्त्व
किल = निश्चय
भवान् = आप ही हैं और हैं केवल ज्ञानगम्य

मनवाणी के अविषय शुद्ध बुद्धाखण्ड सनातन ब्रह्म तुमही हो २५

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमुधरणिरात्मात्वमिति च ।
परिछिन्नामेवं त्वयि परिणता बिभ्रतु गिरं-
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६॥

अन्वय—शम्भो ! त्वम् अर्कः त्वम् सोमः त्वम् पवनः त्वम् हुतवहः त्वम् आपः त्वम् व्योम उ (वितर्के) त्वम् धरणिः त्वम् च आत्मा असि इति परिणताः त्वयि एवम् परिच्छिन्नाम् गिरम् बिभ्रतु नाम वयम् तु (हि) यत् त्वम् न भवसि तत् तत्त्वम् न हि विद्मः ॥ २६ ॥

त्वम् = हे गिरीश ! तुम
अर्कः = सूर्य हो
त्वम् = तुम
पवनः = वायु हो
त्वम् = तुम
हुतवहः = अग्नि हो
त्वम् = तुम
व्योम = आकाश हो
त्वम् = तुम
धरणिः = पृथ्वी
उ = और
आत्मा = आत्मा भी तुम ही
असि = हो यानी ये आठ मूर्तियां तुम्हारी हैं
इति = इस प्रकार इन मूर्तियों के मानने में
परिणताः = दृढ़ बुद्धि पण्डितजन
त्वयि = आपके विषय में
एवम् = ऐसी
परिच्छिन्नाम् = परिच्छिन्न
गिरम् = एक देशी वाणी को
बिभ्रतुनाम = कहते रहें किन्तु
वयम् = हम
तु = तो
इह = इस संसार में
यत् = जो वस्तु
त्वम् = आप
न = नहीं
भवसि = हों
तत् = उस
तत्त्वम् = पदार्थ को ही
न = नहीं
विद्मः = जानते अर्थात् सब कुछ तुम ही हो ॥२६॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णै स्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः,
समस्तं व्यस्तं त्वां शरणदगृणात्योमिति पदम् ॥२७

अन्वय--शरणद व्यस्तंओम् इति पदम् त्रयीम् तिस्रः वृत्तीः त्रिभुवनम् अथो त्रीन् सुरान् अपि त्रिभिःअकाराद्यैः वर्णै अभिदधत् (पुनः)तीर्णविकृति तुरीयम् ते धाम अणुभिः ध्वनिभिः अवरुन्धानम् (पुनः)समस्तम् (एतादृशम्) त्वाम् गृणाति ॥२७॥

शरणद ! = हे शरण्य !
व्यस्तम् = व्यस्त (न मिला हुआ
ओम् = ॐ
इति = यह
पदम् = पद व नाम
अकाराद्यैः = अकार उकार मकार
त्रिभिः = इन तीन
वर्णैः = अक्षरों द्वारा
त्रयीम् = ऋगादि तीनों वेदों
तिस्रः = तीन
वृत्तीः = उदात्तादि स्वरों अथवा जाग्रत आदि अवस्थाओं को तथा
त्रिभुवनम् = त्रिलोकी या तीन शरीर
अथो = और उन्होंके अभिमानी
त्रीन् = तीनों
सुरान् = ब्रह्मा, विष्णु, रुद्र हिरण्यगर्भ, विराट, ईश्वर, विश्व, तैजस प्राज्ञ, देवों को
अपि = भी
अभिदधत् = कहता है अर्थात् इस कारणकार्य प्रपञ्च से युक्त आपका बोधक है
समस्तम् = और मिला हुआ ॐ पद समुदाय
ते = शक्ति द्वारा तुम्हारे
तीर्णविकृति = निर्विकार
तुरीयम् = विशुद्ध शान्त
धाम = स्वरूप को
अणुभिः = अतिसूक्ष्म
ध्वनिभिः = नाद ध्वनियों से
अवरुन्धानम् = अवगत कराता हुआ
त्वाम् = तुम्हारा ही
गृणाति = प्रतिपादन करता है अर्थात् ओम् के वाच्यार्थ और लक्ष्यार्थ तुम ही हो ।

तस्य वाचकः प्रणवः, के अनुसार पदशक्तिसे ॐ के वाच्यार्थ और समुदाय शक्ति से ॐ के लक्ष्यार्थ तुम ही हो ॥ २७ ॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।

अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि,
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥ २८

अन्वय——देव भवः शर्वः रुद्रः पशुपतिः अथ उग्रः सह महान् तथा भीमेशानौ-इति यत् अभिधानाष्टकम् (अस्ति) अमुष्मिन् श्रुतिः अपि प्रत्येकं अस्मै धाम्ने-प्रियाय प्रविचरति (एवं रूपाय) भवते प्रणिहितनमस्योऽस्मि ॥ २८ ॥

देव = हे महादेव !
भवः = भव
शर्वः = शर्व
पशुपतिः = पशुपति
अथ = और
उग्रः = उग्र
सह-महान् = महेश (महादेव)
तथा = तथा
भीमेशानौ = भीम-ईशान
इति = ऐसा पवित्र
यत् = जो तुम्हारा
इदम् = यह
अभिधा-नाष्टकम् = नामाष्टक है, तुम्हारी
अमुष्मिन् = इस नामाष्टक के

प्रत्येकम् = प्रत्येक नाम द्वारा
श्रुतिः = वेद शास्त्र और
अपि = ब्रह्मादि देवगण भी
प्रविचरति = स्तुती करते हैं यानी वेद स्मृति पुराणआदि का यह नामाष्टक सार है अतः
अतः = स्तुत्य और मोक्षरूप
प्रियाय = परमप्रिय
धाम्ने = ज्योति-स्वरूप शंकर भगवान् को मैं
प्रणिहित-नमस्यः = साष्टाङ्ग प्रणाम करता
अस्मि = हूं ॥ २८ ॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो-
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।

नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो-
नमः सर्वस्मै ते तदिदमतिसर्वाय च नमः ॥ २९ ॥

अन्वय--प्रियदव ! नेदिष्ठाय नमः दविष्ठाय च नमः स्मरहर ! क्षोदिष्ठायः नमः च महिष्ठाय नमः त्रिनयन ! वर्षिष्ठाय नमः यविष्ठाय च नमः (सुरेश) सर्वस्मै ते नमः अतिसर्वाय च तत् इदम् नमः (इति पाठे तु शर्वाय नमः इति विशेषः)॥२९॥

प्रियदव = हे संन्यासिन् !
नेदिष्ठाय = अतिसमीपवर्ती
नमः = तुम को नमस्कार
च = और अत्यन्त
दविष्ठाय = दूर में रहनेवाले
नमः = तुम को प्रणाम
स्मरहर = हे मदनान्तक !
क्षोदिष्ठाय = अति लघुरूप तुमको
नमः = नमस्कार
च = तथा
महिष्ठाय=महानसे महान तुमको
नमः = नमस्कार
हे त्रिनयन ! = हे त्र्यम्बक
वर्षिष्ठाय = आप वृद्ध रूपमें तथा
यविष्ठाय = अत्यन्त युवक रूप में भी रहते हो
नमो नमः = अतः तुम्हारे उस रूप को प्रणाम एवं
सर्वस्मै = अखिलब्रह्माण्डरूप
ते = तुम्हारे लिये
नमः = नमस्कार हो
च = और
अतिसर्वाय = प्रपञ्च से रहित अनिर्वचनीय तुमको
इदम् = यह
नमः = नमस्कार क्योंकि
तत् = वह सच्चिदानंद ब्रह्म ही
इदम् = यह प्रपंच है अथवा
इदम् = यह दृश्य
तत् = ब्रह्म ही है ॥ २९ ॥

सर्वं खल्विदं ब्रह्म के अनुसार सब कुछ आप जगद् रूप हो और सर्व प्रपञ्च से अतीत भी हो अतः मैं सर्वभावेन आप को प्रणाम करता हूं।

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः,
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः,
प्रमहसिपदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३० ॥

अन्वय—ईश ! विश्वोत्पत्तौ भवाय नमो नमः तत्संहारे प्रबलतमसे हराय नमो नमः सत्त्वोद्रिक्तौ जनसुखकृते मृडाय नमो नमः प्रमहसिपदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३० ॥

= और हे महेश !
विश्वोत्पत्तौ=संसार सर्ग के लिए
बहलरजसे=तुम्हारे रजोगुणी
भवाय=ब्रह्मा स्वरूप को
नमोनमः=बार २ नमस्कार और
सत्त्वोद्रिक्तौ=सत्त्वगुणकी वृद्धि में
जनसुखकृते=जीव हित कारी विश्व पालक
मृडाय=(मृडरूप) विष्णुतुमको
नमोनमः=नमस्कार २ तथा
तत्संहारे=प्रलय के लिये
प्रबलतमसे=तुम्हारे तमोगुणी
हराय=रुद्ररूप को भी
नमोनमः=नमस्कार हो और
प्रमहसि=परमश्रेष्ठ
निस्त्रैगुण्ये=गुणातीत मायारहित
पदे=मोक्षधाम
शिवाय=शिव को
नमोनमः=बारम्बार प्रणाम है

सर्जन-पालन-और संहरण इन क्रियाओं से ही रजोगुणी-भव (ब्रह्मा) तमोगुणी-हर (रुद्र) और सत्त्वगुणविशिष्ट मृड (विष्णु) ये नाम और रूप आप के हुए हैं, वस्तुतः हे शिव ! आप तो अखण्ड ब्रह्म अर्थात् सजातीय-विजातीय-स्वगतभेद शून्य हैं और प्रपञ्चो-पशमम् शांतम् के अनुसार अद्वितीयात्मतत्त्व और केवल मोक्ष-

स्वरूप हैं हे ओंकार वेद्य ! आप को शिवोऽहम् इस प्रकार अभेद से जान कर ही 'ब्रह्म विद् ब्रह्मैव भवति' जीव ब्रह्म है ॥ ३० ॥

कृशपरिणति चेतः क्लेशवश्यं क्व चेदम्;
क्व च तव गुणासीमोल्लङ्घिनी शश्वदृद्धिः ।
इतिचकितममन्दीकृत्य मां भक्तिराधा
द्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१ ॥

अन्वय–हे वरद ! क्लेशवश्यम् कृशपरिणति इदम् (मदीयम्) चेतः क्व च तव गुणसीमोल्लङ्घिनी शश्वद् ऋद्धिः क्व च इति चकितम् माम् भक्तिः अमन्दीकृत्य ते चरणयोः वाक्यपुष्पोपहारम् आधात् ॥ ३१ ॥

वरद ! = हे वरदायक !
क्लेशवश्यम् = अविद्यादिपांचदुःखों के वश और
कृशपरिणति = बलहीन क्षुद्रविषय
इदम् = यह मेरा
चेतः = अन्तःकरण तो
क्व = किस योग्य है
च = और
क्व = कहाँ
तव = आप की
गुणसीमोल्लं = अपरिमित-अनन्त
घिनी = और गुणों की सीमा से बाहर
शश्वत् = नित्य
ऋद्धिः = विभूति
च = तथा इस
इति = अपनी असमर्थता के कारण
चकितम् = भयाकुलसा था तो भी
माम् = मुझे
भक्तिः = आपकी भक्ति ने ही
अमन्दीकृत्य = योग्य बनाया है और
ते = तुम्हारे
चरणयोः = पादपद्मों में मुझ से यह
वाक्यपुष्पो = कवितामय
पहारम् = पुष्पों की भेट
आधात् = कराई है ॥ ३१ ॥

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे,
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं,
तदपि तव गुणानामीश पारं न याति ॥३२॥

अन्वय—ईश ! [तव गुणलेखनार्थम्] सिन्धुपात्रे असितगिरिसमम् कज्जलं स्यात् सुरतरुवरशाखा लेखनी उर्वी पत्रम् [स्यात्] यदि शारदा गृहीत्वा सर्वकालम् लिखति तदपि तव गुणानाम् पारम् न याति ॥ ३२ ॥

ईश ! = हे विश्वम्भर ! आपके गुण लिखने के लिए
सिन्धुपात्रे = समुद्र रूपी पात्र में
असितगिरि = काले पर्वतों के
समम् = समान
कज्जलम् = स्याही और
सुरुतरुवर-शाखा = कल्पवृक्ष शाखा की
लेखनी = कलम तथा
उर्वी = भूमि की
पत्रम् = पट्टी इत्यादि बृहद् सामग्री को
यदि = यदि स्वयं
शारदा = सरस्वती भी
गृहीत्वा = लेकर
सर्वकालम् = सतत
लिखति = लिखती रहे
तदपि = तो भी
तव = आप के
गुणानाम् = गुणों के
पारम् = पार को
न = नहीं
याति = पा सकती फिर मैं तो किस गिनती में हूं

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो-
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ।। ३३ ।।

अन्वय—सकलगुणवरिष्ठः पुष्पदन्ताभिधानः असुरसुर मुनीन्द्रैः अर्चितस्य इन्दुमौलेः ग्रथितगुणमहिम्नः निर्गुणस्य ईश्वरस्य अलघुवृत्तैः रुचिरम् एतत् स्तोत्रम् चकार ।। ३३ ।।

असुरसुर-मुनीन्द्रैः = असुर-देव और मुनीश्वरों से
अर्चितस्य = पूजित
इन्दुमौलेः = चन्द्रधारी तथा
ग्रथितगुण-महिम्नः = प्रशंसित गुणों से युक्त और
निर्गुणस्य = फिर भी गुणातीत
ईश्वरस्य = शिवजी भगवानका
अलघुवृत्तैः = शिखरिणी छन्दों द्वारा
रुचिरम् = अत्यन्त मनोहर
एतत् = इस
स्तोत्रम् = महिम्नः स्तोत्र को
सकलगु-णवरिष्ठः = सर्वप्रकारके शुभ-गुणोंसे अलंकृत
पुष्पदन्ताभि = पुष्पदन्ताचार्य
धानः = ने
चकार = बनाया है

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्,
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र,
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च ।। ३४ ।।

अन्वय—यः पुमान् शुद्धचित्तः (सन्) परमभक्त्या धूर्जटेः एतत् अनवद्यम् स्तोत्रम् पठति सः अत्र प्रचुरतरधनायुः पुत्रवान् कीर्तिमान् च भवति तथा (देहत्यागानन्तरम्) शिवलोके रुद्रतुल्यः च भवति (तस्मात्सर्वैर्मुमुक्षुभिः सेव्यो भगवान् शिवः) ॥३४॥

यः = जो
पुमान् = मनुष्य
शुद्धचित्तः = पवित्रान्तःकरण से
परमभक्त्या = अनन्य भक्ति पूर्वक
धूर्जटेः = भगवान् शिव के
एतत् = इस
अनवद्यम् = पवित्र
स्तोत्रम् = स्तोत्र को
पठति = पढता है या पढ़ेगा
सः = वह
अत्र = इस लोक में
प्रचुरतर = बहुत धन धान्य
धनायुः = आयु वाला होकर
पुत्रवान् = पुत्रवान् और
कीर्तिमान् = यशस्वी
भवति = होता है तथा
तथा = देह त्याग के बाद
शिवलोके = शिव लोक में
रुद्रतुल्यः = शिव समान् हो जाता है

अर्थात् शिवभक्त का जन्म मरणका चक्र सर्वथा समाप्त हो जाता है ॥३४॥

दीक्षा दानं तपस्तीर्थं होमयागादिकाः क्रियाः
महिम्नःस्तव पाठस्य कलांनार्हन्ति षोडशीम् ॥३५॥

अन्वय—दीक्षा दानम् तपः तीर्थम् होमयागादिकाः क्रियाःमहिम्नःस्तवपाठस्य षोडशीम् कलाम् न अर्हन्ति ॥३५॥

यज्ञकर्म का अधिकार दान तपस्या तीर्थ सेवन होम यज्ञ आदिक सफल क्रियायें हे शम्भो ! तुम्हारे इस महिम्नः स्तोत्र पाठकी सोलहवीं कला को भी नहीं पा सकतीं ।

आसमाप्त मिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ।। ३६ ।।

अन्वय--पुण्यम् गन्धर्वभाषितम् अनौपम्यम् मनोहारि ईश्वरवर्णनम् शिवम् इदम् स्तोत्रम् आसमाप्तम् ।। ३६ ।।

शिव महिमा से भरा हुआ परम पवित्र पुष्पदन्तकृत अनुपम और सुन्दर यह ३२ श्लोकों का मोक्षप्रद स्तोत्र समाप्त हुआ ।।३६।।

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वंगुरोःपरम् ।।३७।।

अन्वय--महेशात् अपरः देवः न महिम्नः अपरा स्तुतिः न अघोरात् अपरः मन्त्रो न गुरोः परम् तत्त्वम् न अस्ति ।।३७।।

शिवजीसे उत्तम अन्य कोई देवयाईश्वर नहीं अर्थात् संसारके कर्ता भर्ता-संहर्ता और शुद्ध ब्रह्म शिव ही हैं । और महिम्नः स्तोत्र से श्रेष्ठ दूसरी कोई स्तुति नहीं है अघोर मन्त्र से सद्यः फलप्रद कोई मन्त्र नहीं तथा गुरुजी से बड़ा कोई पदार्थ नहीं है ।।३७।।

कुसुमदशननामा सर्वगन्धर्वराजः,
शिशुशशिधरमौलेर्देवदेवस्य दासः ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्,
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः ।।३८।।

अन्वय—शिशुशशिधरमौलेः देवदेवस्य दासः कुसुमदशन नामा सर्व गन्धर्वराजः (आसीत्) अस्य रोषात् निजमहिम्नः भ्रष्टः

एव सः (स्वत्वलाभार्थम्) दिव्यदिव्यम् इदम् महिम्नः स्तवनम् अकार्षीत् खलु ॥ ३८ ॥

शिशुशशिधरमौलेः = बालचन्द्रधारी भगवान्
देवदेवस्य = महादेव का
दासः = सेवक
कुसुमदशननामा = पुष्पदन्त नामक एक
सर्व गन्धर्वराजः = सब गन्धर्वों का राजा था
सः = वह
अस्य = शिव के
रोषात् = क्रोध से
एव = ही

निजमहिम्नः = अपने महत्व से च्युत
भ्रष्टः = हो गया था फिर उसने शिव सन्तुष्टि के लिये
दिव्यदिव्यम् = परम दिव्य
इदम् = इस
महिम्नः = महिम्न
स्तवनम् = स्तोत्र को
अकार्षीत् = रचा (बनाया) और
खलु = अपनी शक्ति प्राप्त की ॥ ३८ ॥

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः,
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३९ ॥

अन्वय—न अन्यचेताः (सन्) प्राञ्जलिः मनुष्यः सुरवरमुनिपूज्यम् स्वर्गमोक्षैकहेतुम् पुष्पदन्तप्रणीतम् अमोघम् इदम् स्तवनम् यदि पठति (तर्हि) किन्नरैः स्तूयमानः शिवसमीपम् व्रजति ॥ ३९ ॥

अन्यचेताः = अन्यचित्त
न = न होता हुआ
प्राञ्जलिः = हाथ जोड़ कर
मनुष्यः = जो नर (नारी)
सुरवरमुनिपूज्यम् = इन्द्रादि देवों और संन्यासियों के द्वारा पूजित एवं
स्वर्गमोक्षैकहेतुम् = स्वर्ग तथा मोक्ष के कारण
पुष्पदन्तप्रणीतम् = पुष्पदन्त कृत
अमोघम् = अमोघ
इदम् = इस
स्तवनम् = महिम्नः स्तोत्र को
यदि = यदि
पठति = पढ़ें तो वह साधक
किन्नरैः = किन्नरों द्वारा
स्तूयमानः = पूजित होकर
शिवसमीपम् = मोक्ष को
व्रजति = प्राप्त होता है ॥३९॥

श्री पुष्पदन्तमुखपंकजनिर्गतेन,
स्तोत्रेण किल्विषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन,
सुप्रीणितो भवति भूतपतिर्महेशः ॥ ४० ॥

अन्वय—श्री पुष्पदन्तमुखपंकजनिर्गतेन किल्विषहरेण हरप्रियेण कण्ठस्थितेन समाहितेन पठितेन स्तोत्रेण भूतपतिः महेशः सुप्रीणितः भवति ॥ ४० ॥

पुष्पदन्तमुखपंकजनिर्गतेन = पुष्पदन्ताचार्य के मुख कमल से बने
किल्विषहरेण = पापहारी और
हरप्रियेण = महादेव जी के प्यारे तथा
समाहितेन = सर्वहितकारक
कण्ठस्थितेन = कण्ठ किये हुए इस
स्तोत्रेण = महिम्नः स्तोत्र के पाठ से
भूतपतिः = भगवान् विश्वनाथ
महेशः = शंकर
सुप्रीणितः = बहुत प्रसन्न
भवति = होते हैं और देते हैं भक्तको आत्मज्ञान

इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः ।
अर्पिता तेन देवेशः प्रीयताम् मे सदाशिवः ॥ ४१ ॥

अन्वय—एषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः तेन (गन्धर्वराजेन) अर्पिता (तस्मात् प्रसन्नो भूत्वा महत्वं दत्तवान्) इति मे (पाठकस्याऽपि) देवेशः सदाशिवः प्रीयताम् ॥ ४१ ॥

इस महिम्न स्तोत्र द्वारा की हुई पूजा को श्री शिव जी के चरणों में पुष्पदन्त ने सादर समर्पण किया और शंकर प्रसन्न हुए थे, और उसे महत्व प्रदान किया था, इस लिए आज अर्पण करने वाले मेरे ऊपर भी देवदेव शंकर प्रसन्न होवें और मोक्ष दें ॥ ४१ ॥

यदक्षरं पदं भ्रष्टं मात्राहीनं च यद् भवेत् ।
तत्सर्वं क्षम्यताम् देव प्रसीद परमेश्वर ॥ ४२ ॥

अन्वय—यद् अक्षरम् पदम् भ्रष्टम् च मात्रा हीनम् यद् भवेत् हे देव ! तत् सर्वम् क्षम्यताम् (तथा) हे परमेश्वर प्रसीद ।४२।

जो प्रमाद वश अक्षर पाद की भूल, और जो मात्राओं की कमी हो जाय, या हुई हो तो उस सर्व को हे परमेश्वर ! आप क्षमा करें तथा हे देव ! आप प्रसन्न हों ॥ ४२ ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ १ ॥

ॐ शान्तिः शान्तिः शान्तिः

(श्रीविद्वद्वरिष्ठ पुष्पदन्ताचार्यविरचित श्री महिम्नः स्तोत्रम् समाप्तम्)

* इति *

अर्थ—त्रिविध दुःख नाशक ओंकार स्वरूप वह परब्रह्म पूर्ण है और

तीन प्रकारके दुःखों के नाश के लिये मंत्र में शान्ति शब्द का त्रिवार पाठ किया है, यह जगत भी पूर्ण है और उस ब्रह्म की पूर्णता से यह दृश्यपूर्णतायुक्त उत्पन्न होता है तथा पूर्ण ब्रह्म की पूर्णता लेकर भी पश्चात् ब्रह्मपूर्ण ही शेष रहता है ॥ १ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥
श्री साम्बसदाशिवार्पणमस्तु ॥

इति श्री स्वामि प्रकाशानन्द विजयि शास्त्रि व्याकरण वेदान्ताचार्य हि० विशारदकृत श्री शिवमहिम्न स्तोत्रान्वय प्रतिपदार्थ प्रबोधिनी सरलार्थभाषा टीका समाप्ता ॥

॥ ॐ तत्सत् ॐ तत्सत् ॐ तत्सत् ॥

---

* अथ शिवनामावलिः *

महादेव शिव शङ्कर शम्भो उमाकान्त हर त्रिपुरारे ।
मृत्युञ्जय वृषभध्वज शूलिन् गङ्गाधर मृडमदनार ॥
हर शिव शङ्कर गौरीशं वन्दे गङ्गाधरमीशम् ।
रुद्रं पशुपतिमीशानं कलये काशी पुरिनाथम् ॥
जय शम्भो २ शिव गौरीशङ्कर जय शम्भो ॥ १ ॥
जय शम्भो २ शिव गौरी शङ्कर जय शम्भो ।

* ॐ नमो नारायणाय *

ॐ नमः शिवाय

इस मन्त्र का ५००० हज़ार जाप प्रतिदिन करने से सर्व-सिद्धि प्राप्त होती है ।

॥ अथ पञ्चाक्षर स्तोत्रम् ॥

नागेन्द्रहाराय त्रिलोचनाय, भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगंबराय, तस्मै 'न' काराय नमः शिवाय॥१॥
मन्दाकिनी सलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय । मन्दारपुष्प बहुपुष्पसुपूजिताय, तस्मै 'म' काराय नमः शिवाय ॥ २ ॥ शिवाय गौरीवदनाब्जवृन्द, सूर्याय दक्षाध्वरनाशकाय । श्री नीलकण्ठाय वृषभध्वजाय, तस्मै 'शि' काराय नमः शिवाय ॥ ३ ॥ वसिष्ठ कुम्भोद्भवगोतमाय, मुनीन्द्रदेवार्चितशेखराय । चन्द्रार्कवैश्वानरलोचनाय, तस्मै 'व' काराय नमः शिवाय ॥ ४ ॥ यक्ष स्वरूपाय जटाधराय, पिनाकहस्ताय सनातनाय । दिव्याय देवाय दिगम्बराय तस्मै 'य' काराय नमः शिवाय ॥ ५ ॥

पञ्चाक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ ।
शिव लोकमवाप्नोति शिवेन सह मोदते ॥ १ ॥

॥ इति शिव पञ्चाक्षर स्तोत्रम् सम्पूर्णम् ॥

॥ वेदसारशिवस्तवः ॥

(जगद्गुरु-श्रीमच्छङ्करभगवत्पादप्रणीतम्)

पशूनां पतिं पापनाशं परेशं, गजेन्द्रस्य कृत्तिं वसानं वरेण्यम् ॥
जटाजूटमध्ये स्फुरद्गाङ्गवारिं, महादेवमेकं स्मरामि स्मरारिम् ॥१॥
महेशं सुरेशं सुरारातिनाशं, विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं, सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥ २ ॥
गिरीशं गणेशं गले नीलवर्णं, गवेन्द्राधिरूढं गुणातीतरूपम् ।

भवं भास्वरं भस्मना भूषिताङ्गं, भवानीकलत्रं भजे पंचवक्त्रम् ॥३॥

शिवाकान्त ! शंभो ! शशाङ्कार्धमौले !
महेशान ! शूलिन् ! जटाजूटधारिन् !
त्वमेको जगद्व्यापको विश्वरूप ! प्रसीद प्रसीद प्रभो ! पूर्णरूप ॥४॥

परात्मानमेकं जगद्बीजमाद्यं, निरीहं निराकारमोङ्कारवेद्यम् ।
यतो जायते पाल्यते येन विश्वं, तमीशं भजे लीयते यत्र विश्वम् ॥५॥

न भूमिर्न चापो न वह्निर्न वायुः,
न चाकाशमास्ते न तन्द्रा न निद्रा ।
न ग्रीष्मो न शीतं न देशो न वेषो,
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥

अजं शाश्वतं कारणं कारणानां,
शिवं केवलं भासकं भासकानाम् ।
तुरीयं तमःपारमाद्यन्तहीनं, प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥

नमस्ते नमस्ते विभो ! विश्वमूर्ते ! नमस्ते नमस्ते चिदानन्दमूर्ते !
नमस्ते नमस्ते तपोयोगगम्य ! नमस्ते नमस्ते श्रुतिज्ञानगम्य ! ॥८॥

प्रभो ! शूलपाणे ! विभो ! विश्वनाथ !
महादेव ! शम्भो ! महेश ! त्रिनेत्र !
शिवाकान्त ! शान्त ! स्मरारे ! पुरारे !
त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥

शम्भो ! महेश करुणामय ! शूलपाणे !,
गौरीपते ! पशुपते ! पशुपाशनाशिन् !
काशीपते ! करुणया जगदेतदेकः,
त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥ १० ॥

त्वत्तो जगद्भवति देव ! भव ! स्मरारे !
त्वय्येव तिष्ठति जगन्मृड ! विश्वनाथ !
त्वय्येव गच्छति लयं जगदेतदीश,
लिङ्गात्मकं हर ! चराचरविश्वरूपिन् ॥ ११ ॥

रावणकृतशिवतांडवस्तोत्रम् ।

श्रीगणेशाय नमः ॥ जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरीविलोल-
वीचिवल्लरीविराजमानमूर्धनि । धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचंद्रशेखरे रतिः प्रतिक्षणं मम ॥ १ ॥ धराधरेंद्रनंदिनीवि-
लासबंधुबंधुरस्फुरद्दिगंतसंततिप्रमोदमानमानसे । कृपाकटाक्षधो-
रणीनिरुद्धदुर्धरापदि क्वचिच्चिदंबरे मनो विनोदमेतु वस्तुनि ॥ २ ॥
जटाभुजंगपिंगलस्फुरत्फणामणिप्रभाकदंबकुंकुमद्रवप्रलिप्तदिग्व-
धूमुखे । मदांधसिंधुरस्फुरत्त्वगुत्तरीयमेदुरे मनो विनोदमद्भुतं
बिभर्तु भूतभर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषलेखशेखरप्रसूनधू-
लिधोरणीविधूसरांघ्रिपीठभूः । भुजंगराजमालया निबद्धजाटजूटकः
श्रियै चिराय जायतां चकोरबंधुशेखरः ॥ ४ ॥ ललाटचत्वरज्वल-
द्धनंजयस्फुलिंगभानिपीतपंचसायकं नमन्निलिंपनायकम् । सुधामयू-
खलेखया विराजमानशेखरं महाकपालिसंपदे शिरो जटालमस्तु
नः ॥ ५ ॥ करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्धनंजयाधरीकृतप्र-
चंडपंचसायके । धराधरेंद्रनंदिनीकुचाग्रचित्रपत्रकप्रकल्पनैक-
शिल्पिनि त्रिलोचने मतिर्मम ॥ ६ ॥ नवीनमेघमंडलीनिरुद्धदुर्धर-
स्फुरत्कुहूनिशिथिनीतमःप्रबंधबंधुकंधरः । निलिंपनिर्झरीधरस्तनोतु
कृत्तिसिंधुरः कलानिधानबंधुरः श्रियंजगद्धुरंधरः ॥७॥ प्रफुल्लनील-
पंकजप्रपंचकालिमच्छटाविडंबिकंठकंधरारुचिप्रबंधकंधरम् । स्मर-
च्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं गजच्छिदांधकच्छिदं
तमंतकच्छिदं भजे ॥ ८ ॥ अगर्वसर्वमंगलाकलाकदंबमंजरीरस-

प्रवाहमाधुरीविजृंभणामधुव्रतम् । स्मरांतकं पुरांतकं भवांतकं मखांतकं गजांतकांधकांतकं तमंतकांतकं भजे ॥ ९ ॥ जयत्वदभ्रविभ्रमभ्रमद्भुजंगमस्फुरद्धगद्धगद्विनिर्गमत्करलाभाल-हव्यवाट् । धिमिद्धिमिद्धिमिध्वनन्मृदंगतुंगमंगलध्वनिक्रम-प्रवर्तितप्रचंडतांडवः शिवः ॥ १० ॥ दृषद्विचित्रतल्पयोर्भुजंगमौक्तिकस्रजोर्गरिष्ठरत्नलोष्ठयोःसुहृद्विपक्षपक्षयोः। तृणारविंदचक्षुषोः प्रजामहीमहेंद्रयोः समं प्रवर्तयन्मनः कदा सदाशिवं भजे ॥ ११ ॥ कदा निलिंपनिर्झरीनिकुंजकोटरे वसन्विमुक्तदुर्मतिः सदा शिरःस्थमंजलिं वहन् । विमुक्तलोललोचनाललामभाललग्नकः शिवेति मंत्रमुच्चरन्कदा सुखी भवाम्यहम् ॥ १२ ॥ इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति संततम्। हरे गुरौ स भक्तिमाशु याति नान्यथा गतिं विमोहनं हि देहिनां तु शंकरस्य चिंतनम् ॥ १३ ॥ पूजावसानसमये दशवक्त्रगीतं यः शंभुपूजनमिदं पठति प्रदोषे। तस्य स्थिरां रथगजेंद्रतुरंगयुक्तां लक्ष्मीं सदैव सुमुखीं प्रददाति शंभुः ॥ १४ ॥ इति श्रीरावणविरचितं शिवतांडवस्तोत्रं संपूर्णम् ॥

॥ ॐ ॥

समर्पणम्

येन व्याप्तमिदं विश्वं जडञ्च चेतनायते ।
तं श्रीमच्चेतनानन्दं प्रणौमिजगतां गुरुम् ॥

विश्वाचर्य्य-वन्द्य-परममान्य वेदान्तवेद्य श्रीमत्परमहंसपरिव्राजकाचार्य-जगद्गुरु श्री १००८ स्वामि श्री चेतनानन्द (जी) महाराज शान्त महान्तप्रवराः ! श्रीलचरणपावनसेवायां

सादरम् ०—

नम्रता से पुष्प यह देता हूँ गुरुवर ! लीजिये । स्वशिष्य को शिवभक्ति दे भगवन् ! कृतार्थ कीजिये ॥

श्रीचरणशिष्यः-

प्रकाशानन्दगिरिः 'विजयी'

—नीराजनक्रमबोधकवचन—

आदौ चतुः पादतलैकदेशे द्वौ नाभिदेशे सकृदास्यमण्डले ।
सर्वाङ्गदेशेषु च सप्तवारं रामार्तिकं भक्तजनः प्रकुर्यात् ॥

श्री भगवान् के तत्तदंगों का ध्यान और आरती करनेका नियम

(अंग)	(संख्या)
चरणारविन्द	चारवार
नाभिकमल	द्वो बार
मुखारविन्द	एक बार
सर्वांङ्ग	सात बार

१४ वार देवों के अभिमुख आरती उतारे

स्नान का मंत्र ॥ पुष्करादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ २

भोजन का मंत्र ॥ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतं ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ ३ ॥

तुलसी कोजल चढ़ाना ॥ तुलस्यमृतनामासि सदा त्वं केशवप्रि
स्नानं कुरु महादेवि कल्याणं कुरु सर्वदा ॥ ४ ॥

सूर्य नारायण को जल चढ़ाना ॥ एहि सूर्य सहस्रांशो तेजो राशे जगत्पते ।
अनुकंपय मा भक्त्या गृहाणर्घ्यं दिवाकर ॥५॥

पुस्तक प्राप्तिस्थान

१-श्री स्वामी चेतनानन्द गिर्याश्रम कनखल (हरिद्वार) उत्तर प्रदेश